तस्याष्टषष्टिनामानि चेत्राणि च यथा,—
मनुरुवाच ।
"मन्दरस्थं महादेवं ब्रह्मा पृच्छति शङ्करम् ।
केषु केषु च स्थानेषु द्रष्टव्योऽसि मया प्रभो ! ॥
ईश्वर उवाच ।
वाराणस्यां महादेवं प्रयागे तु महेश्वरम् ।
नैमिषे देवदेवञ्च गयायां प्रपितामहम् ॥
कुरुक्षेत्रे विदुः स्थाणुं प्रभासे शशिभूषणम् ।
पुष्करे तु अयोगन्धिं विश्वञ्च विमलेश्वरे ॥
अट्टहासे महानादं महेन्द्रे तु महाव्रतम् ।
उज्जयिन्यां महाकालमाकोटे तु महोत्कटम् ॥
शङ्कुकर्णे महातेजं गोकर्णे च महाबलम् ।
भैरवे भैरवाकारं भवं वस्त्रापदे विदुः ॥
उग्रं कनखले चैव भद्रकर्णाह्रदे शिवम् ।
देवदारुवने दिण्डिं चण्डीशं मध्यमङ्गले ॥
ऊर्द्धरेतं त्वरण्डे तु सकलाण्डे कपर्द्दिनम् ।
कृत्तिवाससमेकाग्रे सूक्ष्मं ताम्रातिकेश्वरे ॥
कालञ्जरे नीलकण्ठं श्रीकण्ठं मण्डलेश्वरे ।
ध्यानं सिद्धेश्वरे योगी गायत्त्रीचोत्तरेश्वरे ॥
विजयं नाम काश्मीरे जयन्तं मरुकेश्वरे ।
हरिश्चन्द्रे हरिश्चैव पुरिश्चन्द्रे तु शङ्करम् ॥
जटावासेश्वरे विद्यां सौम्यं कुक्कुटकेश्वरे ।
भूतेश्वरे भस्मगात्रं जललिङ्गे जलेश्वरम् ॥
भिक्षुकं कर्णिकायान्तु वाराहं विन्ध्यपर्व्वते ।
तान्त्रं पश्चिमसन्ध्यायां विरजायां त्रिलोचनम् ॥
हसेश्वरे त्रिशूलन्तु श्रीशैले त्रिपुरान्तकम् ।
जललिङ्गे विदुः कालिं कापालिं करवीरके ॥
दीप्तचक्रेश्वरे वेदं नेपाले पशुपतिं पतिम् ।
श्रीकारारोहणे कूटं देविकायामुमापतिम् ॥
गङ्गायां सागरे त्वमरमोङ्कारममरकण्टके ।
सप्तगोदावरे भीमं स्वयम्भुं नकुलेश्वरे ॥
कर्णिकारे गणाध्यक्षं कैलासे च गणाधिपम् ।
हेमकूटे विरूपाक्षं भूर्भुवं गन्धमादने ।
सिद्धेश्वरन्तु आकाशे पाताले चट्टकेश्वरम् ॥
अष्टषष्टिञ्च नामानि देवदेवस्य धीमतः ।
पुराणे चोपगीतानि ब्राह्मणस्य स्वयम्भुवा ॥
यः पठेत् प्रातरुत्थाय स्नातो वा यदि वा
शुचिः ।
मुच्यते सर्व्वपापेभ्यः शिवलोकं स गच्छति ॥"
इत्याद्ये देवीपुराणे अष्टषष्टिनामानि महादेवस्य ॥*॥ तस्य द्वादशनामस्तोत्रम् ।
"प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः ।
तृतीयः शङ्करो ज्ञेयश्चतुर्थो वृषभध्वजः ॥
पञ्चमः कृत्तिवासाश्च षष्ठः कामाङ्गनाशनः ।
सप्तमो देवदेवेशः श्रीकण्ठश्चाष्टमः स्मृतः ॥
ईश्वरो नवमो ज्ञेयो दशमः पार्व्वतीपतिः ।
रुद्र एकादशश्चैव द्वादशः शिव उच्यते ॥
द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
कृतघ्नश्चैव गोघ्नश्च ब्रह्महा गुरुतल्पगः ॥
स्त्रीबालघातकश्चैव सुरापो वृषलीपतिः ।
मुच्यते सर्व्वपापेभ्यो रुद्रलोकं स गच्छति ॥"
इति स्कन्दपुराणम् ॥*॥

तन्नामोच्चारणफलं यथा,—
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
सद्यः प्रलयमायान्ति महादेवेति कीर्त्तनात् ॥
महादेव महादेव महादेवेति वादिनम् ।
वत्सं गौरिव गौरीशो धावन्तमनुधावति ॥"
इति पुराणम् ॥*॥
तस्य प्रणाममन्त्रः ।
"नमस्ये त्वां महादेव ! लोकानां गुरुमीश्वरम् ।
पुंसामपूर्णकामानां कामपूरामराङ्घ्रिपम् ॥"
इति श्रीभागवतम् ॥
"महादेवं महात्मानं महायोगिनमीश्वरम् ।
महापापहरं देवं मकाराय नमो नमः ॥"
इति तन्त्रम् ॥*॥
तस्य कालरूपवर्णनं यथा,—
नारद उवाच ।
"कालरूपी त्वया ख्यातः शम्भुर्गगनगोचरे ।
लक्षणञ्च स्वरूपञ्च सर्व्वं व्याख्यातुमर्हसि ॥
पुलस्त्य उवाच ।
स्वरूपं त्रिपुरघ्नस्य वदिष्ये कालरूपिणः ।
अश्विनी भरणी चैव कृत्तिका प्रथमांशकम् ॥
मेषकं हि विजानीयात् कुजक्षेत्रमुदाहृतम् ।
आग्नेयांशास्त्रयो ब्रह्मन् ! प्राजापत्यं कवेर्गृहम् ॥
सौम्यार्द्धं वृषनामेदं वदनं परिकीर्त्तितम् ।
मृगार्द्धमार्द्रादित्यांशास्त्रयः सौम्यगृहन्त्विदम् ॥
मिथुनं भुजयोस्तस्य गगनस्थस्य शूलिनः ।
आदित्यांशश्च पुष्यञ्च अश्लेषा शशिनो गृहम् ॥
राशिः कर्कटको नाम पार्श्वेन खविलासिनः ।
पित्र्यर्क्षं भगदैवत्यं उत्तरांशश्च केशरी ॥
सूर्य्यक्षेत्रं विभोर्ब्रह्मन् हृदयं परिकीर्त्तितम् ।
उत्तरांशास्त्रयः पाणिश्चित्रार्द्धं कन्यका त्विदम् ॥
सोमपुत्त्रस्य सद्मैतत् द्वितीयं जठरं विभोः ।
चित्रांशद्वितयं स्वाती विशाखायांशकत्रयम् ॥
द्वितीयं शुक्रसदनं तुलानाभिरुदाहृतम् ।
विशाखांशमनुराधा ज्येष्ठा भौमगृहं त्विदम् ॥
द्वितीयं वृश्चिको राशिर्मेढ्रं कालस्वरूपिणः ।
मूलं पूर्व्वोत्तरांशश्च देवाचार्य्यगृहं धनुः ॥
ऊरुयुगलमीशस्य अमरर्षे ! प्रगीयते ।
उत्तरांशास्त्रयो ऋक्षं श्रवणं मकरो मुने ! ॥
धनिष्ठार्द्धं शनिक्षेत्रं जानुनी परिकीर्त्तिते ।
धनिष्ठार्द्धं शतभिषा प्रोष्ठपदांशकत्रयम् ॥
सौरं सद्मापरमिदं कुम्भो जङ्घे च विश्रुते ।
प्रोष्ठपद्यांशमेकन्तु उत्तरा रेवती तथा ॥
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ॥
एवं कृत्वा कालरूपं त्रिनेत्रो
यज्ञं क्रोधान्मार्गणैराजघान ।
विद्धश्चासौ वेदनाबुद्धियुक्तः
खे सन्तस्थौ तारकाभिश्चिताङ्गः ॥"
इति वामनपुराणे ५ अध्यायः ॥

महादेवी, स्त्री, (महादेवस्य पत्नीति । पत्न्यर्थे ङीष् । यद्वा, महती चासौ देवी चेति ।) दुर्गा । यथा,
"अपर्णा स्यान्महादेवी गिरिजा मेनकात्मजा ॥"
इति हलायुधः ॥
तस्या व्युत्पत्तिर्यथा,—
"पूज्यते या सुरैः सर्व्वैर्महाश्चैव प्रमाणतः ।
धातुर्महेति पूजायां महादेवी ततः स्मृता ॥"
इति देवीपुराणे ४५ अध्यायः ॥
राज्ञी । पाटराणी इति भाषा । तत्पर्य्यायः ।
महिषी २ पट्टार्ज्ञी ३ पट्टदेवी ४ । इति राजनिर्घण्टः ॥ (यथा, कथासरित्सागरे । ५ । ५६ ।
"आलिखत् स महादेवीं योगनन्दञ्च तं पटे ।
सजीवमिव तच्चित्रं वाक्चेष्टारहितं त्वभूत् ॥")

महादैत्यः, पुं, (महांश्चासौ दैत्यश्चेति ।) भौत्यमन्वन्तरीयदैत्यविशेषः । यथा,—
"चतुर्द्दशस्य भौत्यस्य शृणु पुत्त्रान्मनोर्मम ।"
इत्युपक्रम्य ।
"शुचिरिन्द्रो महादैत्यो रिपुहन्ता हरिः
स्वयम् ।"
इति गारुडे ८७ अध्यायः ॥

महाद्रावकः, पुं, (द्रावयति रोगानिति । द्रु + णिच् + ण्वुल् । महांश्चासौ द्रावकश्चेति ।) औषधविशेषः । द्रावक इति भाषा । यथा,—
"यवक्षारस्य भागौ द्वौ स्फटिकारेस्त्रयो मताः ।
एकीकृत्य प्रपिष्यापि मृन्मैर्व्वस्त्रतरीभवैः ॥
शुष्कं कृत्वा क्षिपेत् पात्रे सैसके वस्त्रलेपिते ।
अन्यसीसकपात्रन्तु द्विमुखं मेलयेद्बुधः ॥
दृढवैद्योपदेशेन पचेत् पात्रस्थमौषधम् ।
ततो ज्वालाधतः स्थाप्यं पात्रान्यं लभते
रसम् ॥
ततो रसं विनिष्कृष्य स्थापयेत् स्निग्धभाजने ।
लवङ्गेन वटीं कुर्य्यादथवा मृततास्रकैः ॥
प्लीहादिस्थूलरोगेषु दापयेत् रक्तिकां भिषक् ।
द्रवीकरोति रोगञ्च महाद्रावकसंज्ञकः ॥
श्वित्रे च दद्रुरोगे च प्रलेपं द्रावकस्य च ।
वह्निवल्कलतं तस्य दधि दत्त्वा प्रलेपयेत् ॥"*॥
अपि च ।
"वृषचित्रमपामार्गं चिचा कुष्माण्डनाडिका ।
स्नुही तालस्य पुष्पञ्च वर्षाभूर्व्वेतसं तथा ॥
एतेषां क्षारमाहृत्य निम्पाकस्वरसेन च ।
क्षालयित्वा क्षारतोयं वस्त्रपूतञ्च कारयेत् ॥
चण्डातपेन संशोष्य ग्राह्यं तद्द्रवशोषितम् ।
एतस्य द्विपलं ग्राह्यं यवक्षारपलद्वयम् ॥
स्फटिकारिपलञ्चैव नरसारपलं तथा ।
पलार्द्धं सैन्धवं ग्राह्यं टङ्कणं तोलकद्वयम् ॥
कासीसं तोलकञ्चैव मुद्राशङ्खञ्च तोलकम् ।
दारुमोचं कर्षकञ्च तोलं समुद्रफेनकम् ॥
सर्व्वमेकत्र संचूर्ण्य वकयन्त्रेण साधयेत् ।
महाद्रावकमेतद्धि योज्यञ्च रसजारणे ।
हन्ति गुल्मादिकान् रोगान् यकृत्प्लीहोदराणि च ॥" * ॥
इति भैषज्यरत्नावली ॥
(तथापरञ्च ।
"शुद्धं काञ्चनमाक्षिकं मृदुतरं कांस्याभिधेयन्तथा
सिन्धूत्थं विमलं रसाञ्जनवरं फेनं स्रवन्तीपतेः ।